अष्टमः पाठः

श्रम एव विजयते

अमेरिकादेशे एकस्मिन् स्थाने सैनिकानाम् आवासाय निर्माणकार्यं प्रचलद् आसीत्। तत्र द्वारादिनिर्माणहेतोः काष्ठस्य गुरुतरः खण्डः नीयते स्म। केचित् सैनिकाः बृहत्कायं तं काष्ठखण्डं भूमेः उत्थाप्य यानम् आरोपयितुं यतमानाः आसन्। किन्तु काष्ठस्य अतिभारत्वात् बहुप्रत्यये अपि ते अक्षमा अभवन्।तेषां सैनिकानाम् एकः नायकः अपि आसीत्, य दूरत एव अधिकबलप्रयोगाय तान् प्रेरयति स्म।

अत्रान्तरे कश्चन् तुरङ्गाधिरूढः तत्र आगतः। स भारवहने अक्षमान् सैनिकान् विलोकयन् नायकम् अवदत् - किं पश्यति भवान्? यदि एतेषां सहयोगं भवान् कुर्यात्, तदा कार्यं सुकरं स्यात्।नायकः प्रोवाच - किं न वेत्ति भवान् ? अहम् एतेषाम् अधिकारी अस्मि। कथम् एतैः सह कार्यं कुर्याम्?तत्कथनं श्रुत्वा सः अश्वसादी अश्वाद् अवातरत्, निजं कोटपरिधानं च अवतार्य भूमौ न्यदधात्। ततः असौ काष्ठखण्डस्य उन्नयने सैनिकैः साकं बलसाहाय्यम् अकरोत्। काष्ठखण्डः याने आरोपितः अभवत्। सर्वे तस्य सहयोगं प्राशंसन्। नायकः अपि धन्यवादं वितीर्णवान्।तदनु स आगन्तुकः पुनः अश्वम् आरुह्य नायकम् अभाषत- महाशय! यदा कदाचिद् ईदृशः अवसरः आपतेत्, प्रधानसेनापतिः वाशिंगटनः स्मर्यताम्। स पुनरपि आगमिष्यति। स्वसेनापतिं वाशिंगटनम् अभिजानन् स नायकः लज्जितो भूत्वा क्षमाम् अयाचत।

शब्दार्थः

द्वारादिनिर्माणहेतोः = द्वार आदि के निर्माण के लिए। **उत्थाप्य** = उठाकर। **काष्ठस्य** = लकड़ी का। **यानम्** = सवारी। **आरोपयितुं** = चढ़ाने के लिए। **यतमानाः** = प्रयत्नशील। **अतिभारवत्वात्** = अधिक भारी होने से। **अक्षमाः** = असमर्थ। **दूरतः** = दूर से। **तुरगाधिरूढः** = घोड़े पर सवार। **सुकरम्** = सरल (आसान)। **परिधानम्** = वस्त्र। **आगच्छन्** = आता हुआ। **अश्वसादी** = घुड़सवार। **अवधेयम्** = याद रखें। **प्राशंसन्** = प्रशंसा किये। **आपतेत्** = आये। **स्मर्यताम्** = याद करें। **अभिजानन्** = जानते हुए।

अभ्यासः

1. उच्चारणं कुरुत पुस्तिकायां च लिखत-

द्वारादिनिर्माणहेतोः काष्ठस्य उत्थाप्य स्मार्यताम्

अतिभारवत्त्वात् आपतेत् आरुह्य आगमिष्यति

2. पूर्णवाक्येन उत्तरत -

(क) किमर्थं काष्ठस्य गुरुतरः खण्डः नीयते स्म?

(ख) सैनिकाः कथं बहुप्रत्यये अपि अक्षमाः जाताः ?

(ग) कः दूरतः एव अधिकबलप्रयोगाय तान् प्रेरयति स्म ?

(घ) तुरगाधिरूढः पुरुषः सैनिकान् विलोकयन् नायकं किम् अवदत् ?

3. अधोलिखितपदानां विभक्तिं वचनं च लिखत -

पदम् विभक्तिः वचनम्

यथा- सैनिकानाम् षष्ठी बहुवचनम्

अश्वाद्................... ....

याने ....

क्षमाम्................... ....

4. अधोलिखितक्रियापदानां लकारं पुरुषं वचनं च लिखत -

क्रियापदम् लकारः पुरुषः वचनम्

यथा- अवदत् लङ्.लकारः प्रथमपुरुषः एकवचनम्

भवन्ति ....

आसीत्.................. ....

गमिष्यति ....

अकरोत्.................. ....

5. उपसर्गं लिखत -

पदम् उपसर्गः

यथा- अधिरूढः ...अधि...

प्रोवाच ....

अभिजानन्..................

विलोकयन्..................

6. मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत -

आवासाय, काष्ठखण्डम्, नायकः, अश्वसादी, वायुयानस्य।

(क)..................... सैनिकान् प्रेरयति

(ख)..................... गतिः तीव्रा भवति।

(ग).................... अश्वाद् अवातरत्।

(घ) भूमे उत्थाय .... आरोपयितुम्।

7. संस्कृतभाषायाम् अनुवादं कुरुत -

(क) सैनिकों के आवास के लिए निर्माणकार्य चल रहा था।

(ख) उन सैनिकों का एक नायक भी था।

(ग) वह घुड़सवार घोड़े से उतरा।

(घ) कोई भी कार्य बड़ा या छोटा नहीं होता।

(ङ) मैं खाता हुआ नहीं चलता हूँ।

(च) मैं हसँता हुआ पानी नहीं पीता हूँ।

शिक्षण-सङ्केतः

1.कक्षायां छात्रैः पाठस्य अनुच्छेदानां वाचनं कारयत तथा हिन्दीभाषायाम् अर्थ-लेखनस्य गतिविधिं कारयत।

2.'कर्मप्रधानं जगत्' इत्युक्तौ संस्कृते पञ्चवाक्यानि लेखयत।

आत्मवत् सर्वभूतेषु यः पश्यति सः पण्डितः।